हिंसार्थानां प्रयोगे च कृति कर्म्मणि कर्त्तरि ।
न कर्तृकर्म्मणोः षष्ठी निष्ठादौ प्रतिपादिता ।
द्विविधं प्रातिपदिकं प्रातिपदिकमजन्तकम् ॥*॥
भुवादिभ्यस्तिङो लः स्याल्लकारा दश वै स्मृताः ।
तिप्तसन्ति प्रथमो मध्यः सिप्थस्थोत्तमपूरुषः ॥
मिप्वस्मसः परस्मै तु पदानाञ्चात्मनेपदम् ।
तातामातामन्तां प्रथमो मध्यस्थासाथांध्वमुत्तमः ॥
आदेशा इवहिमह्यन्ता अनिजादपि धातुतः ।
नाम्नि प्रयुज्यमानेऽपि प्रथमः पुरुषो भवेत् ॥
मध्यमो युष्मदि प्रोक्त उत्तमः पुरुषोऽस्मदि ।
भुवाद्या धातवः प्रोक्ताः सनाद्यन्तास्तु धातवः ॥
लडीरितो वर्त्तमाने स्मेनातीते च धातुतः ।
भूतानद्यतने लङ् च लोङाशिषि च धातुतः ॥
विध्यादावेवानुमतौ लिङ्विधिर्म्मन्त्रणे भवेत् ।
निमन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु तथाशिषि ॥
लिड्तीते परोक्षे स्याल्लङ् लुङ् लृट् लृङ् भविष्यति ।
स्याद्द्यतने लृट् च भविष्यति च धातुतः ॥
धातोर्लिङ्क्रियाभिपत्तौ लिङर्थे लोट् प्रकीर्त्तितः ।
कृतस्त्विष्वपि वर्त्तन्ते भावे कर्म्मणि कर्त्तरि ।
शतृशानचतव्यानीयक्त्वाल्यपादयः ॥”
इति गारुड़े कुमारव्याकरणे २०९ अध्यायः ॥
कुमार उवाच ।
“सिद्धोदाहरणं वक्ष्ये संहितादि परस्परम् ।
विप्रान् चागतान् घोदं स्मृतमं स्यात् पितृषभः ॥
होतृकारो विष्णुतेयं लाङ्गलीषा मनीषया ।
गङ्गोदकं तवल्कार ऋणार्णं प्रार्णमित्यपि ॥
शीतार्त्तश्च तवल्कारः सैन्द्री सौकार इत्यपि ।
मध्वासनश्च पित्रर्थे नन्वयं नाप्ययोजयेत् ॥
नायको लवणं नावस्त एते तेन ईश्वराः ।
देवीगृहमथोऽत्र यथुरेहि पटू इमौ ॥
अमी अश्वाः षड्श्वेति तनुराखुत्तृणानि च ।
तच्चरेत्तन्नु नातीति तन्नणं तच्छ्मशानकम् ॥
सुगण्ण्च पचन्नत्र भवांश्छादयतीति दिक् ।
भवांष्टकुरकश्चैव भवांस्तरति संहृतिम् ॥
भवाँल्लिखति ताञ्छेते भवाञ्छरोऽन्यदीदृशम् ।
भवाञ्छीनं त्वन्तरषि त्वङ्करोषि सदार्चनम् ॥
कश्चरेत् कष्टकारेण कः कुर्य्यात् कः खवे स्थितः ।
कः शेते चैव कः षण्ढः कोऽर्थः को याति गौरवम् ।
क इहार्थे त एवाहुर्देवा आहुश्च भो व्रज ।
प्रभूर्विष्णुर्व्रजति च गीष्पतिश्चैव धूष्पतिः ॥
तस्मान्नैष व्रजेत् स स्यान्न कर्त्तव्यमुगच्छति ।
कुटीच्छाया तथाच्छाया साधवोऽन्ये तथेदृशाः ॥
समासाः षट् पुराणे ये सद्भिः कर्म्मधारयः ।
द्विगुस्त्रिवेदी ग्रामस्थो ह्ययं तत्पुरुषः स्मृतः ॥
तत्कृतश्च तदर्थश्च वृकभीतिश्च यद्धनम् ।
ज्ञानदक्षिणतत्त्वज्ञो बहुव्रीहिरथाव्ययौ ॥
भावोऽधिस्त्रि यथोक्तित्वं द्वन्द्वो देवर्षिमानवाः ।
तद्धिताः पाण्डवः शैवो ब्राह्मश्च भवतादयः ॥
देवाभिसखिपत्यं शुक्लोऽस्त्ययं भुवः पिता ।
ना प्रशास्ता च रा गौर्ग्लौ रूढ़ान्ताश्च पुंस्यपि ॥*॥
हलन्ताश्चाम्बयुक् प्राक्तुङ्वत्क्रयान्मृगाविधः ।
आत्मा राजा युवा पन्थाः पूषब्रह्महणौ शशी ॥
विड्वेधा उशनानड्वान् मधुलिट् काष्ठतट् तथा ॥*॥
वनवार्य्यस्थिवस्तूनि जगत्साभाहनी तथा ॥
कर्म्म सर्पिर्वपुस्तेज अजन्तान्ता नपुंसके ॥*॥
जाया जरा नदी लक्ष्मीः श्रीः स्त्री भूमिर्वधूरपि ॥
भूः पुनर्भूस्तथा धेनुः स्वसा माता च गौः स्त्रियः ।
वाक् स्रक् धी चुत् क्षुधः पामा युवतिः ककुभस्तथा ॥
द्यौर्वृतिः प्रावृषश्चैव सुमन उष्णिही स्त्रियाम् ।
गुणद्रव्यक्रियायोगात्त्रिलिङ्गांश्च वदामि ते ॥
शुक्लः कीलालपाश्चैव शुचिश्च ग्रामणीः सुधीः ।
पटुः कमलभूः कर्त्ता सुमती वहवः सुनौः ॥
सत्यो नाम्रस्तथा ध्वंसो मधुभव्यमदीर्घपात् ।
धनार्यौ च सुहृत् सोमौ वागङ्गस्वादिकस्तथा ॥
सुवर्णं बहुपाच्चैवा चैषा त्वनडुहा तथा ॥*॥
सर्व्वविश्वोभये चोभौ अन्यान्तरेतराणि च ।
इतरडतरे नेमः समोऽथ सिम इत्ययम् ।
पूर्व्वापरावराश्चैव दक्षिणश्चोत्तराधरौ ।
अपरश्चान्तरोऽप्येतद्यत्तत्किमदसो इयम् ।
युष्मदस्मत् प्रथमश्चरमाल्पे तथार्द्धके ।
एकः कतिपयो द्वौ च त्रयः सर्व्वादयस्तथा ॥*॥
सुविविदिपविक्रन्दिधार्य्यश्च ययतिः स्वदिः ॥
गौहुर्विधा जुहोतिश्च जहातिश्च दधात्यपि ।
दीव्यति सूयतिर्वापि पुष्यशिरथिणोत्यपि ॥
तुटिश्चाह्वयति स्वपि रुधि युञ्जौ स्वती तनिः ।
तमिः करोति क्रीणाति शृणोतिर्द्युति वर्द्धति ॥
कलीडकृपराचीवा धानवश्च युना तथा ॥*॥
भवत् भवान् भवन्तौ च ज्ञेयं कर्त्तव्यमेव च ॥
कार्य्यं कृतश्च कृत्वा च प्रत्ययाः स्युस्तथापरे ।
सूर्य्याहरौ सुराः सन्ति देवविप्रवनान्यथ ॥
नरेण कार्य्यं वेदेन क्रियते देहि भोजनम् ।
द्विजाय च वरिष्ठाभ्यां मा तेभ्योऽस्तु समागतः ॥
तीर्थात्तथाश्रमाभ्याञ्च सत्येभ्यः श्वशुरस्य च ।
गन्धर्व्वयोः करणानाञ्च ज्ञानं सिद्धमहात्मयोः ॥
ज्ञानतत्त्वेषु चैत्येवमन्ये नेया यथामति ।
सर्व्वे तिष्ठन्ति सर्व्वस्मै सर्व्वस्मात् सर्व्वतो गतः ॥
सर्व्वेषाञ्चैव सर्व्वस्मिन्नेवं विश्वादयस्तथा ।
पूर्व्वः पूर्व्वाश्च पूर्व्वस्मात् पूर्व्वस्मिन् पूर्व्व इत्यतम् ॥
सूत उवाच :
सुप्तिङन्तं सिद्धरूपं नाममात्रेण दर्शितम् ।
कात्यायनः कुमारात्तु ज्ञात्वा विस्तरमब्रवीत् ॥”
इति गारुड़े कुमारव्याकरणं २१० अध्यायः ॥*॥
एतद्भिन्नं अग्निपुराणे कार्त्तिकेयोक्तव्याकरणमस्ति । एवं महेशकृतमाहेशव्याकरणं पाणिनिमुनिकृतपाणिनीयव्याकरणं शर्व्ववर्म्मकृतकलापव्याकरणं क्रमदीश्वरकृतसंक्षिप्तसारव्याकरणं पद्मनाभदत्तकृतसुपद्मव्याकरणं वोपदेवकृतमुग्धबोधव्याकरणं गोस्वामिकृतहरिनामामृतव्याकरणं भट्टोजीदीक्षितकृतसिद्धान्तकौमुदीव्याकरणं अनुभूतस्वरूपाचार्य्यादिकृतसारस्वतादिव्याकरणानि च सन्ति ॥*॥ (विस्तारः । यथा, महाभारते । १२ । २५१ । ११ ।
“व्यवसायात्मिका बुद्धिर्म्मनो व्याकरणात्मकम् ॥”)

व्याकुलः, त्रि, (विशेषेण आकुलः ।) शोकादिभिरितिकर्त्तव्यताशून्यः । तत्पर्य्यायः । विह्वलः २ । इत्यमरः ॥ (यथा, महाभारते । ५।१७७।२५ ।
“चरौद सा शोकवती वाष्पव्याकुललोचना ॥”
उपद्रुतः । यथा, भागवते । १ । ३ । २८ ॥
“एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे ॥”)

व्याकुलात्मा, [न्] त्रि, (व्याकुलः आत्मा यस्य ।) शोकाभिहतचित्तः । यथा,—
“भो हृष्टाः पर्व्वतस्था बहुकुसुमयुता वायुना घूर्णमाना
रामोऽहं व्याकुलात्मा दशरथतनयः पृच्छते शोकदग्धः ।
बिम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या
हा सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा ॥”
इति महानाटकम् ॥

व्याकृतिः, स्त्री, (विशिष्टा आकृतिः ।) भङ्गिः । इति हलायुधः ॥

व्याकोशः, त्रि, (व्याकुशति प्रस्फुटतीति । वि+आ+कुश+कः ।) विकशितः । इत्यमरटीकायां रामाश्रमः ॥ (यथा, माघे । ४ । ४६ ।
“होवापि नूनमहिमांशुरसौ किशेति
व्याकोशकोकनदतां दधते नलिन्यः ॥”
भावे घञ् । प्रस्फुटनम् । यथा, स्वच्छकटिके । १ अङ्के ।
“पद्मव्याकोशं भास्करं वालचन्द्रं
वापीविस्तीर्णं स्वस्तिकं पूर्णकुम्भम् ।
तत्कस्मिन् देशे दर्शयाम्यात्मशिल्पं
दृष्ट्वा श्वो यद्विस्मयं यान्ति पौराः ॥”)

व्याकोचः, त्रि, (व्याकुचति सङ्कुलीभावाद्बहिर्निःसरतीति । वि+आ+कुच+कः ।) प्रफुल्लः । इत्यमरः ॥ (यथा, महाभारते । ७।३०। २२ ।
“तं पद्मनिकराकारं पद्मपत्रनिभेक्षणम् ।
व्याकोचपद्माभिमुखो नलो विव्याध सायकैः ॥”)

व्याख्या, स्त्री, (व्याख्यानमिति । वि+आ+ख्या+“आतश्चोपसर्गे ।” इत्यङ् । ततष्टाप् ।) विवरणम् । इति हलायुधः ॥ (यथा, भागवते । ७ । १३ । ८ ।
“न शिष्याननुबध्नीत ग्रन्थान्नैवाभ्यसेद्बहून् ।
न व्याख्यामुपयुञ्जीत नारम्भानारभेत् क्वचित् ॥”
ग्रन्थः । यथा, तन्त्रसारे वागीश्वरीप्रकरणे ।
“शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखण्डोज्ज्वलां